# bhramarAmbAShTakam shrImAtRistavaH shrIshailabhagavatyaShTakam

# ભ્રમરામ્બાષ્ટકમ્ અથવા શ્રીમાતૃસ્તવઃ શ્રીશૈલભગવત્યષ્ટકમ્

## Document Information

Text title : bhramarambAShTakaM (1) or Matristava

File name : bhramaraambaa8.itx

Category : aShTaka, devii, otherforms, shankarAchArya, devI

Location : doc_devii

Author : Shankaracharya

Transliterated by : Aravind Krishna seeksha at hotmail.com

Proofread by : Aravind Krishna seeksha at hotmail.com, Kamakshi kAmAkShi7 at gmail.com

Latest update : February 24, 2002, January 31, 2009

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

bhramarAmbAShTakam shrImAtRistavaH shrIshailabhagavatyaShTakam

# ભ્રમરામ્બાષ્ટકમ્ અથવા શ્રીમાતૃસ્તવઃ શ્રીશૈલભગવત્યષ્ટકમ્

ચાઞ્ચલ્યારુણલોચનાઞ્ચિતકૃપાચન્દ્રાર્કચૂડામણિં
    ચારુસ્મેરમુખાં ચરાચરજગત્સંરક્ષણીં તત્પદામ્ ।
ચઞ્ચ્ચમ્પકનાસિકાગ્રવિલસન્મુક્તામણીરઞ્જિતાં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૧॥

કસ્તૂરીતિલકાઞ્ચિતેન્દુવિલસત્પ્રોદ્ભાસિફાલસ્થલીં
    કર્પૂરદ્રાવમિક્ષચૂર્ણખદિરામોદોલ્લસદ્વીટિકામ્ ।
લોલાપાઙ્ગતરઙ્ગિતૈરધિકૃપાસારૈર્નતાનન્દિનીં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૨॥

રાજન્મત્તમરાલમન્દગમનાં રાજીવપત્રેક્ષણાં
    રાજીવપ્રભવાદિદેવમકુટૈ રાજત્પદામ્ભોરુહામ્ ।
રાજીવાયતમન્દમણ્ડિતકુચાં રાજાધિરાજેશ્વરીં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૩॥

ષટ્તારાં ગણદીપિકાં શિવસતીં ષડ્વૈરિવર્ગાપહાં
    ષટ્ચક્રાન્તરસંસ્થિતાં વરસુધાં ષડ્યોગિનીવેષ્ટિતામ્ ।
ષટ્ચક્રાઞ્ચિતપાદુકાઞ્ચિતપદાં ષડ્ભાવગાં ષોડશીં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૪॥

શ્રીનાથાદૃતપાલિતાત્રિભુવનાં શ્રીચક્રસંચારિણીં
    જ્ઞાનાસક્તમનોજયૌવનલસદ્ગન્ધર્વકન્યાદૃતામ્ ।
દીનાનામાતિવેલભાગ્યજનનીં દિવ્યામ્બરાલંકૃતાં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૫॥

લાવણ્યાધિકભૂષિતાઙ્ગલતિકાં લાક્ષાલસદ્રાગિણીં
    સેવાયાતસમસ્તદેવવનિતાં સીમન્તભૂષાન્વિતામ્ ।

ભાવોલ્લાસવશીકૃતપ્રિયતમાં ભણ્ડાસુરચ્છેદિનીં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૬॥

ધન્યાં સોમવિભાવનીયચરિતાં ધારાધરશ્યામલાં
    મુન્યારાધનમેધિનીં સુમવતાં મુક્તિપ્રદાનવ્રતામ્ ।
કન્યાપૂજનપુપ્રસન્નહૃદયાં કાઞ્ચીલસન્મધ્યમાં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૭॥

કર્પૂરાગરુકુઙ્કુમાઙ્કિતકુચાં કર્પૂરવર્ણસ્થિતાં
    કૃષ્ટોત્કૃષ્ટસુકૃષ્ટકર્મદહનાં કામેશ્વરીં કામિનીમ્ ।
કામાક્ષીં કરુણારસાર્દ્રહૃદયાં કલ્પાન્તરસ્થાયિનીં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૮॥

ગાયત્રીં ગરુડધ્વજાં ગગનગાં ગાન્ધર્વગાનપ્રિયાં
    ગમ્ભીરાં ગજગામિનીં ગિરિસુતાં ગન્ધાક્ષતાલંકૃતામ્ ।
ગઙ્ગાગૌત્મગર્ગસંનુતપદાં ગાં ગૌતમીં ગોમતીં
    શ્રીશૈલસ્થલવાસિનીં ભગવતીં શ્રીમાતરં ભાવયે ॥ ૯॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છંકરભગવતઃ કૃતૌ
    ભ્રમરામ્બાષ્ટકં સમ્પૂર્ણમ્ ॥

Encoded by Aravind Krishna seekSha at hotmail.com
Proofread by KamakShi kAmAkShi7 at gmail.com

*bhramarAmbAShTakam shrImAtRistavaH shrIshailabhagavatyaShTakam*
pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*